# Sarangahunakritam Krishnanarayana Stotram

# સારઙ્ગહૂણકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Sarangahunakritam Krishnanarayana Stotram

File name : sArangahUNakRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 209/24-38||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# સારઙ્ગહૂણકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

લોમશાદ્યો મન્ત્રવરઃ પ્રાપ્તોઽશ્વપટ્ટતીર્થિના ।
તેન પુરા ચ તં મન્ત્રં જજાપ હૂણભક્તરાટ્ ॥ ૨૪॥

“ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને સ્વાહા” ।
અષ્ટોત્તરશતવારં જપ્ત્વા નેમેઽમ્બરે હરિમ્ ॥ ૨૫॥

અનાદિશ્રીકૃષ્ણનારાયણ વિષ્ણો જગદ્ગુરો ।
બાલકૃષ્ણ હરેકૃષ્ણ રક્ષ રક્ષય મામિહ ॥ ૨૬॥

શરણાગતસન્ત્રાતઃ પાહિ સિંહાપદસ્ત્વિહ ।
અરણ્યે ત્વાં વિના કૃષ્ણ રક્ષકોઽન્યો ન વિદ્યતે ॥ ૨૭॥

હરેકૃષ્ણ બાલકૃષ્ણ શીઘ્રમાયાહિ રક્ષ નઃ ।
અન્ધકારે વર્ધમાને મૃત્યુર્નઃ સ્યાન્ન સંશયઃ ॥ ૨૮॥

ભક્તોઽસ્મિ ચેત્તવ કૃષ્ણનરાયણ પ્રરક્ષય ।
પ્રાણિનાં જાયતે મૃત્યુઃ ક્વાપિ નૈવાઽત્ર સંશયઃ ॥ ૨૯॥

કિન્તુ કૃષ્ણ પ્રસહ્યાઽત્ર દેહાનાં નખભેદનૈઃ ।
મહિષીણાં ત્વકાલેઽત્ર મૃત્યુર્યોગ્યો ન મે મતઃ ॥ ૩૦॥

યાસાં દુગ્ધં હિ ભગવન્ પીયતે પ્રત્યહં ત્વયા ।
પ્રાતર્વૈ પૂજને કૃષ્ણ નૈવેદ્યે દિવસે નિશિ ॥ ૩૧॥

યદ્ઘૃતેન પ્રદીપં તે કારયામિ નિશામુખે ।
તાસાં ત્વં રક્ષણં ચેન્ન કરોષિ નિર્દયો નુ કિમ્ ॥ ૩૨॥

યાસાં સુમધુરં ચાપિ પિચ્છલં દધિ ચોત્તમમ્ ।
આસ્વાદયસિ કૃષ્ણ ત્વં કથં નૈવ પ્રરક્ષસિ ॥ ૩૩॥

શીઘ્રમાયાહિ રક્ષાર્થં નો ચેદ્ભક્તસ્તવાઽસ્મિ યઃ ।
સ એવ પ્રથમં પ્રાણાઁસ્ત્યક્ષ્યામિ પશુહેતવે ॥ ૩૪॥

આશ્રિતાનાં રક્ષણં વૈ કાર્યં પ્રાક્સ્વામિના સદા ।
સ્વામિનાશે તતો નાશઃ સ્વામિદોષાય નેષ્યતે ॥ ૩૫॥

ઇમા મહિષ્યો માં કૃષ્ણ વીક્ષન્તિ રક્ષકં પ્રતિ ।
મયિ કૃષ્ણ હૃદયે ત્વં સ્થિતઃ સન્ કિન્ન પશ્યસિ ॥ ૩૬॥

પશ્ય પશ્ય હરે કૃષ્ણ મહાપત્પતિતા ઇમાઃ ।
ભક્ષકો ભક્ષક એવ માસ્તુ ચાસ્ત્વપિ રક્ષકઃ ॥ ૩૭॥

ઇત્યુક્ત્વાઽશ્રૂણિ લક્ષ્મિ સમ્મુમોચ ભક્તરાણ્મમ ।
સારઙ્ગહૂણો દીર્ઘં વૈ શ્વાસં મુમોચ નિસ્પૃહઃ ॥ ૩૮॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૨૦૯-અધ્યાયાન્તર્ગતં સારઙ્ગહૂણકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૨૦૯/૨૪-૩૮॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 209/24-38..

Proofread by PSA Easwaran

*Sarangahunakritam Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*